पदार्थः । यथा,—
"भावः पदार्थो धर्म्मः स्यात् सत्त्वं तत्त्वञ्च
वस्तु च ।"
इति त्रिकाण्डशेषः ॥
( यथा, शकुन्तलायाम् १ अङ्के ।
"सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः ॥" )
जगति वस्तुद्वयं भावोऽभावश्च । इति न्याय-
शास्त्रम् । सच्चिदानन्दाद्वयं ब्रह्म । इति वेदान्त-
सारः ॥ ( यथा, कथासरित्सागरे । २९ । ४८ ।
"अहो वस्तुनि मात्सर्य्यमहो भक्तिरवस्तुनि ।"
कार्य्यम् । यथा, कामन्दकीयनीतिसारे।१५।२५।
"वस्तुष्वशक्येषु समुद्यमश्चेत्
शक्येषु मोहादसमुद्यमश्च ।
शक्येषु कालेन समुद्यमश्च
त्रिधैव कार्य्यव्यसनं वदन्ति ॥"
अर्थः । इति मल्लिनाथः ॥ यथा, कुमारे ।
६ । ६५ ।
"अथाङ्गिरसमग्रण्यमुदाहरणवस्तुषु ।
ऋषयो नोदयामासुः प्रत्युवाच स भूधरम् ॥"
इतिवृत्तम् । यथा, विक्रमोर्व्वश्याम् ।
"अहमस्यां कालिदासग्रथितवस्तुना नवेन नाट-
केनोपस्थास्ये ॥")
वस्तुकं, क्ली, ( वस्तु+संज्ञायां कन् । ) वास्तूकम् ।
इति शब्दरत्नावली राजनिर्घण्टश्च ॥
वस्तुकी, स्त्री, ( वस्तुक+गौरादित्वात् ङीष् । )
श्वेतचिल्लीशाकः । इति राजनिर्घण्टः ॥
वस्त्यं, क्ली, ( वस्+क्तिन् । वस्तिर्वासस्तत्र
साधु । वस्ति+"तत्र साधुः ।" ४ । ४ । ९८ ।
इति यत् । ) गृहम् । इत्यमरः ॥
वस्त्रं क्ली, ( वस्यते आच्छाद्यतेऽनेनेति । वस
आच्छादने+"सर्व्वधातुभ्यः ष्ट्रन् ।" उणा० ४ ।
१५८ इति ष्ट्रन् ।) परिधानाद्युपयुक्तकार्पासादि-
निर्म्मितवस्तु । कापड़ इति भाषा । तत्पर्य्यायः ।
आच्छादनम् २ वासः ३ चेलम् ४ वसनम् ५
अंशुकम् ६ । इत्यमरः ॥ सिचयः ७ पोतः ८
लक्तकः ९ कर्पटः १० शाटकः ११ कशिपुः १२ ।
इति जटाधरः ॥ वाससम् १३ छिचयम् १४
प्रोतम् १५ छादम् १६ वासम् १७ । इति
शब्दरत्नावली ॥*॥ अस्य परिधानविधिर्यथा,
भृगुः ।
"विकच्छोऽनुत्तरीयश्च नग्नश्चावस्त्र एव च ।
श्रौतं स्मार्त्तं तथा कर्म्म न नग्नश्चिन्तयेदपि ॥"
विकच्छः परीधानासंवृतकच्छः । तथा च ।
"परीधानाद्बहिःकच्छा निबद्धा ह्यासुरी भवेत् ।"
स्मृतिः ।
"वामे पृष्ठे तथा नाभौ कच्छत्रयमुदाहृतम् ।
एभिः कच्छैः परीधत्ते यो विप्रः स शुचिः स्मृतः ॥"
बौधायनः ।
"नाभौ धृतश्च यद्वस्त्रमाच्छादयति जानुनी ।
अन्तरीयं प्रशस्तं तदच्छिन्नमुभयोस्तयोः ॥"
प्रशिताः । दशा नाभौ प्रयोजयेत् । स्मृतिः ।
न स्यात् कर्म्मणि कञ्चुकीति । उत्तरीयधारणं
चोपवीतवत् ।
"यथा यज्ञोपवीतञ्च धार्य्यते च द्विजोत्तमैः ।
तथा सन्धार्य्यते यत्नादुत्तराच्छादनं शुभम् ॥"
इति स्मृतेः ॥
अत्र यथा द्विजोत्तमैः सव्यापसव्यत्वादिना उप-
वीतं धार्य्यते तथा उत्तराच्छादनमपि द्विजो-
त्तमैरिति प्रदर्शनमात्रम् । प्रागुक्तभृगुवचनेन
सर्व्वेषां द्विवस्त्रताप्रतीतेः । पारस्करः । एकवे-
दाशो भवति तस्य उत्तरार्द्धेन प्रच्छादयतीति ।
इत्याह्निकतत्त्वम् ॥ * । अस्य धारणगुणाः ।
यथा,—
"काम्यं यशस्यमायुष्यमलक्ष्मीघ्नं प्रहर्षणम् ।
श्रीमत्पारिषदं शस्तं निर्म्मलाम्बरधारणम् ॥"
इति राजवल्लभः ॥ * ॥
अपि च ।
"स्नातस्यानन्तरं सम्यग्वस्त्रेण तनुमार्जनम् ।
कान्तिप्रदं शरीरस्य कण्डूयादोषनाशनम् ॥
कौषेयं चित्रवस्त्रञ्च रक्तवस्त्रं तथैव च ।
वातश्लेष्महरं तत्तु शीतकाले विधारयेत् ॥"
कौषेयं पट्टाम्बरं तसरवस्त्रञ्च ।
"मेध्यं सुशीतं पित्तघ्नं कषायं वस्त्रमुच्यते ।
तद्धारयेदुष्णकाले तच्चापि लघु शस्यते ॥"
कषायं कोकची इति लोके । कषायरागरक्तं
वा ।
"शुक्लन्तु शुभदं वस्त्रं शीतातपनिवारणम् ।
न चोष्णं न च वा शीतं तत्तु वर्षासु धारयेत् ॥
यशस्यं काम्यमायुष्यं श्रीमदानन्दवर्द्धनम् ।
त्वच्यं वशीकरं रुच्यं नवं निर्म्मलमम्बरम् ।"
काम्यं कामोद्दीपकम् ।
"कदापि न जनैः सद्भिर्धार्य्यं मलिनमम्बरम् ।
तत्तु कण्डूकृमिकरं ग्लान्यलक्ष्मीकरं परम् ॥"
अलक्ष्मीरशोभा दारिद्र्यं वा । इति भाव-
प्रकाशः ॥ * ॥ ( अथ स्वप्ने वस्त्रादिदर्शनात्
शुभफलं यथा,—
"कन्यां कुमारकान् गौरान् शुक्लवस्त्रान् सुते-
जसः ।
यः पश्येल्लभते यो वा छत्रादर्शविषामिषम् ॥
शुक्लाः सुमनसो वस्त्रममेध्यालेपनं फलम् ॥
यस्य स्यादायुरारोग्यं वित्तं बहु च सोऽश्नुते ॥"
इति वाभटे शारीरस्थाने षष्ठेऽध्याये ॥ )
अथ नववस्त्रपरीधानदिनम् ।
"नक्षत्रराधवसुतिष्यविशाखहस्त-
चित्रोत्तराश्विपवनादितिरेवतीषु ।
जन्मर्क्षजीवबुधशुक्रदिनोत्सवादौ
धार्य्यं नवं वसनमीश्वरदैवतुष्टौ ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
अपि च ।
"सूर्य्ये चाल्पधनं शशः शशिदिने क्लेशः सदा
भूमिजे
वस्त्राणां बहुता बुधे सुरगुरौ विद्यागमः
सम्पदः ।
नानाभोगयुतः प्रमोदशयनं दिव्याङ्गना भार्गवे
शौरे स्युः खलु रोगशोककलहा वस्त्रे धृते
नूतने ॥"
इति कर्म्मलोचनम् ॥ * ॥
अस्य क्षारसंयोगनिषिद्धदिनानि यथा,—
"नन्दमङ्गलषष्ठीषु द्वादश्यां श्राद्धवासरे ।
वस्त्राणां क्षारसंयोगो दहत्यासप्तमं कुलम् ॥"
इत्याह्निकाचारतत्त्वम् ॥
तद्दानफलं यथा,—
"वासोदश्चन्द्रसालोक्यमश्विसालोक्यमश्वदः ॥"
इति शुद्धितत्त्वम् ॥
अपि च ।
"द्विजानां ये तु सततं शुभवस्त्रप्रदा नराः ।
वस्त्रगन्धयुतः पन्थास्तेषां सुजलशीतलः ॥"
इत्यादि वह्निपुराणे यमधर्म्मिलोपाख्याननामा-
ध्यायः ॥ * ॥ तेन विष्णुपूजाविधिर्यथा,—
"दुकूलपट्टकौषेयवाल्ककार्पासिकादिभिः ।
वासोभिः पूजयेद्विष्णुं सुशुभैरात्मनः प्रियैः ॥"
इति तत्रैव क्रियायोगनामाध्यायश्च ॥
तद्ग्रहणविधिर्यथा । विष्णुधर्म्मोत्तरम् ।
"वस्त्रं दशान्तमादद्यात् परिधाय तथा पुनः ।
आरुह्योपानहौ यानमारुह्यैव च पादुके ॥"
तस्याधिपतिर्यथा । तत्रैव ।
"बार्हस्पत्यं स्मृतं वासः सौम्यानि रजतानि च ।
पश्चिमाश्च तथा सर्व्वे वायव्याः परिकीर्त्तिताः ॥"
तत्प्रतिग्रहप्रायश्चित्तं यथा । हारीतः । मणि-
वासोगवादीनां प्रतिग्रहे सावित्र्यष्टशतं जपेत् ।
अष्टसहस्रं अष्टोत्तरसहस्रम् । इति शुद्धि-
तत्त्वम् ॥ * ॥ अपि च ।
श्रीभगवानुवाच ।
"कार्पासं कम्बलं वाल्कं कौषजं वस्त्रमिष्यते ।
तत् पूर्व्वं पूजयित्वैव मन्त्रैर्देवाय चोत्सृजेत् ॥
निर्दशं मलिनं जीर्णं छिन्नं गात्रावलिङ्गितम् ।
परकीयं वाखुदष्टं सूचीविद्धं तथोषितम् ।
उप्तकेशं विधौतञ्च श्लेष्मणाभिदूषितम् ॥
प्रदाने दैवताभ्यश्च दैवे पैत्रे च कर्म्मणि ।
वर्ज्जयेत् शापयोगेन यज्ञादावुपयोजने ॥"
शापयोगेन इत्यत्र लोपयोगेन इति क्वचित्
पुस्तके पाठः ।
"उत्तरीयोत्तरासङ्गौ निचोलो मोदचेलकः ।
परिधानञ्च पञ्चैतान्यस्यूतानि प्रयोजयेत् ॥
शाणवस्त्रं नीशारञ्च तथैवातपवारणम् ॥"
क्वचित् पुस्तके शाणवस्त्रमित्यत्र मसिवस्त्रमिति
पाठः ।
"चन्द्रातकं तथा दूष्यं पञ्च स्यूतान्यदुष्टये ।
पताकाध्वजदण्डादौ स्यूतं वस्त्रं प्रयोजयेत् ॥
अन्यत्रावरणादौ च तद्विना शस्ततोऽपि च ।
रक्तं कौषेयवस्त्रञ्च महादेव्यै प्रशस्यते ॥
पीतं तथैव कौषेयं वासुदेवाय चोत्सृजेत् ।
रक्तन्तु कम्बलं दद्यात् शिवाय परमात्मने ॥
विचित्रं सर्व्वदेवेभ्यो देवीभ्योऽंशु निवेदयेत् ।
कार्पासं सर्व्वतोभद्रं दद्यात् सर्व्वेभ्य एव तु ॥